# अथ सर्वप्रकारशत्रुविजयमंत्रः-

अथ विनियोगः -

**ॐ अस्य श्री सर्वप्रकारविजयप्रदायकमहामंत्रस्य भगवान् वेदव्यास ऋषिः, अनुष्टुप्छन्दः, श्री अर्जुनो देवता, ह्रीं बींजम्, श्रीं शक्तिः, क्लीं कीलकं, ग्रामपंचायतादारभ्य न्यायालयादिषु वाऽन्यत्र ये विवादाः सन्ति तेषु स्वपक्षस्य विजयप्राप्त्यर्थं जपे विनियोगः।**

अथ ऋष्यादिन्यासः -

**ॐ श्री भगवते वेदव्यासाय ऋषये नमः** - शिरसि। **ॐ श्री अनुष्टुप्छन्दसे नमः** - मुखे।
**ॐ श्री अर्जुनदेवतायै नमः** - हृदये। **ॐ ह्रीं बीजाय नमः** - गुह्ये। **ॐ श्रीं शक्तये नमः** - पादयोः।
**ॐ क्लीं कीलकाय नमः**:- नाभौ। **ॐ ग्रामपंचायादारभ्य न्यायालयादिषु वाऽन्यत्रये विवादाः सन्ति तेषु स्वपक्षस्य सर्वप्रकारविजयप्राप्त्यार्थं जपे विनियोगाय नमः** -सर्वांगे।

अथ करादिन्यासाः :-

| अथ मन्त्राः | अथ करन्यासः | अथ अंगन्यासः |
|---|---|---|
| **ॐ ह्रां नमः** | **अंगुष्ठाभ्यां नमः** | **हृदयाय नमः** |
| **ॐ ह्रीं नमः** | **तर्जनीभ्यां नमः** | **शिरसे स्वाहा** |
| **ॐ ह्रूं नमः** | **मध्यमाभ्यां नमः** | **शिखायै वषट्** |
| **ॐ ह्रैं नमः** | **अनामिकाभ्यां नमः** | **कवचाय हुम्** |
| **ॐ ह्रौं नमः** | **कनिष्ठिकाभ्यां नमः** | **नेत्रत्रयाय वौषट्** |
| **ॐ ह्रः नमः** | **करतलकरपृष्ठाभ्यां नमः** | **अस्त्राय फट्** |

**ॐ भूर्भुवःस्वरोमिति दिग्बन्धः।**

अथ ध्यानम् :-

**यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायन्ति यं सामगाः। ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः।।**

**ॐ नमो नारायणाय श्रीसुदर्शनायास्त्रराजाय फट्** (- जपार्थ, फट् स्थाने स्वाहा होमार्थ)।।

ततः संकल्पानुसारेण आदौ दर्शित नारायणाष्टाक्षरसुदर्शनास्त्राभ्यां एकया मालया संपुटीकृत्येदं मन्त्रं जपेत्,

अथ मन्त्रः -

**अर्जुनः फाल्गुनो जिष्णुः किरिटी श्वेतवाहनः। बीभत्सुः विजयी पार्थः सव्यसाची धनञ्जयः।।**
**कपिध्वजो गुडाकेशो गाण्डिवी कृष्णसारथिः।।**

अथवा

**कौन्तेयार्जुन पुरुषर्षभ पार्थंपरन्तपकुरुप्रवीर। पाण्डवानघ भरतर्षभ धनंजयभारतमहाबाहो।।**

अन्ते च शिवार्पणं कुर्यात्। अनुष्ठानान्ते दशांशं होमं विध्यनुसारेण कुर्यात्।।

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM